"नदीषु देवखातेषु तड़ागेषु सरःसु च । स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु च" इति नारदस्मरणात् । शौचाद्यर्थन्तु यथासम्भवं परकीयेषु पिण्डानुद्धरणेऽपि सर्वस्य न निषेधः" मिता० । "परशय्यासनोद्यानवृद्धयानानि वर्जयेत् । अदत्तान्यग्निहोत्रस्य नाश्नन्नद्यादनापदि" याज्ञ० । शय्या कपिपुः । आसनं पीठादि । उद्यानमाम्रवणादि । वृद्धं प्रसिद्धम् । यानं रथादि परसम्बन्धीन्येतान्यदत्तान्यननुज्ञातानि वर्जयेन्नोपभुञ्जीत : अभोज्यान्नान्याह । अग्निहोत्रस्येति । श्रौतस्मार्त्ताग्न्यधिकाररहितस्य शूद्रस्य प्रतिलोमजस्य बाधिकारवतोऽप्यग्निरहितस्यान्नमनापदि न भुञ्जीत न प्रतिगृह्णीयाच्च । "तस्मात् प्रशस्तानां स्वकर्मणा शूद्रजातीनां ब्राह्मणो भुञ्जीत गृह्णीयाच्चेति" गौतमवचनात्" मिता० । "कदर्य्यबन्धचौराणां क्लीवरङ्गावतारिणाम् । वैणाभिशस्तवार्द्धुषिगणिकागणदोषिणाम्" याज्ञ० । कदर्य्यो लुब्धः "आत्मानं धर्मकृत्यञ्च पुत्रदारांश्च पीड़येत् । लोभाद् यः पितरौ म्रियान् स कदर्य इति स्मृतः" इत्युक्तः । बन्धो निगड़ादिना वाचा सञ्चिरुद्धश्च । चौरो ब्राह्मणसुवर्णव्यतिरिक्तपरस्वापहारी । क्लीवो नपुंसकः । रङ्गावतारो नटचारणमल्लादिः । वेणुच्छेदजीवी वैणः । अभिशस्तः घृतनीयैः कर्मभिरभियुक्तः । वार्द्धुष्यो निषिद्धवृद्ध्युपजीवी । गणिका पण्यस्त्री गणदोषी बह्वयाजकः । एतेषामन्नं नाश्नीयादित्यनुवर्त्तते" मिता० । "चिकित्सकातुरक्रुद्धपुंश्चलोच्छिष्टविड्विषाम् । क्रूरोग्रपतितव्रात्यदाम्भिकोच्छिष्टभोजिनाम्" याज्ञ० । "चिकित्सकोभिषगवृत्त्युपजीवी । आतुरा महारोगोपसृष्टः । "वातव्याध्यश्मरीकुष्ठमेहोदरभगन्दराः । अर्शांसि ग्रहणीत्यष्टौ महारोगाः प्रकीर्त्तिताः" इति । क्रुद्धः कुपितः । पुंश्चलो व्यभिचारिणी । मत्तो विद्यादिना गर्वितः । विद्विट् शत्रुः । क्रूरो दृढ़ाभ्यन्तरकोपः । वाक्कायव्यापारेणोद्वेजकः उग्रः । पतितो ब्रह्महादिः । व्रात्यः पतितसावित्रीकः । दाम्भिको वञ्चकः । उच्छिष्टभोजी परभुक्तोज्झितभोजी । एतेषाञ्चिकित्सकादीनामन्नं नाश्नीयात्" मिता० । "अवीरास्त्रीसुवर्णकारक्लीवजितसामयाजिनाम् । शस्त्रविक्रयकर्मारतन्तुवायशूद्रवृत्तिनाम्" याज्ञ० । "अवीरास्त्री स्वतन्त्रा व्यभिचारमन्तरेणापि । पतिपुत्ररक्षितेत्यन्ये । स्वर्णकारः सुवर्णस्य विकारान्तरकृत् । स्त्रीजितः सर्वत्र स्त्रीवशवर्त्ती । सामयाजी यागस्य शान्त्यादिकर्त्ता बह्वनाहुतनेता च । शस्त्रविक्रयी शस्त्रविक्रययोपजीवी । कर्मारो लोहकारः तक्षादिश्च । तन्तुवायः सूचीशिल्पोपजीवी । शूद्रवृत्तं जीवनमस्यास्तीति शूद्रवृत्तो । एतेषामन्नं नाश्नीयात्" मिता० । "नृशंसराजरजककृतघ्नवधजीविनाम् । चैद्यधावसुराजीवसङ्घोपपतिवेश्मनाम् । पिशुनान्तेवसितोऽवैव तथा चाक्रिकवन्दिनाम् । एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथा" याज्ञ० । "नृशंसो निर्दयः । राजा भूपतिः । बन्धाद्यवर्त्यान्तःपुरोहितश्च । यथाह शङ्खः "भीतावगीतरुदिताक्रन्दितावधूदक्षुधितपरिभुक्तविक्षितोन्मत्तावधूतराजपुरोहितान्नानि वर्जयेत्" । रजको वस्त्रादीनां नीलादिरागकारकः । कृतघ्न उपकृतस्य हन्ता । वधजीवी प्राणिनां बधेन वर्त्तकः । सुराजीवी मद्यविक्रयजीवी । उपपतिर्जारः सङ्घोपपतिना वेश्म यस्यासौ सङ्घोपपतिवेश्मा । पिशुनः परदोषस्य ख्यापकः । अन्तेवसी मिथ्यावादी । चाक्रिकस्तैलिकः । शाकटिकश्चेत्येके "अभिशस्तपतितचाक्रिकतैलिकः" इति भेदेनाभिधानात् । वन्दिनः स्तावकाः सोमविक्रयी सोमलतायाः विक्रेता । एतेषामन्नं न भोक्तव्यम् । सर्वे चैते कदर्य्यादयो द्विजा एव कदर्य्यत्वादिदोषदुष्टा अभोज्यान्ना इतरेषां प्राप्तप्रभावात् प्राप्तिपूर्वकत्वाच्च प्रतिषेधस्य । अग्निहोत्रस्य नाश्नन्नद्यादनापदीत्यत्र शूद्रस्याभोज्यान्नत्वमुक्तम् । तत्र प्रतिप्रसवमाह" मिता० । "शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणः । भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत्" याज्ञ० । "दासगर्भदासादयः गोपालो गवां पालकः गवां पालनेन यो जीवति । कुलमित्रं पितृपितामहादिक्रमागतः । अर्द्धसीरी हलपर्य्याय सीरापलक्षितकृषिफलभागग्राही । नापितः गृह्यव्यापारकारयिता नापितश्च । यश्च वाङ्मनःकायकर्मभिरात्मानं निवेदयति तवाहमिति । एते दासादयः शूद्राणां मध्ये भोज्यान्नाः । चकारात् कुम्भकारश्च । "गोपनापितकुम्भकारकुलमित्रार्द्धकृषिनिवेदितात्मानो भोज्यान्ना" इति वचनात् ।

स्नातकश्च त्रिविधः व्रतस्नातकः विद्यास्नातकः उभयस्नातकश्चेतिभेदात् । तत्र विहितकालपर्य्यन्तं ब्रह्मचर्य्यं कृत्वा वेदमसमाप्यैव व्रतकालोत्तरं कृतसमावर्त्तन आद्यः । विहितकालमध्येऽपि वेदविद्यां लब्ध्वा स्नातो द्वितीयः । विहितकालपर्य्यन्तं ब्रह्मचर्य्यं कृत्वा वेदमलब्ध्वा तं लब्ध्वैव ततकालोत्तरं कृतस्नानस्तृतीयः ।

**स्नातकव्रत** न० हृत० । स्नातककर्त्तव्ये स्मृत्युक्ते व्रतभेदे